कर्म्मदेवानामानन्दः ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्म्मदेवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं आजानदेवानामानन्दाः । स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं देवलोक आनन्दाः । स एको गन्धर्व्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं गन्धर्व्वलोक आनन्दाः । स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं प्रजापतिलोक आनन्दाः । स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । एषः ब्रह्मलोकः सम्राट् ॥ शिवः यथा, महाभारते । १३ । १७ । १४२ ।

"निर्व्वाणं क्षादनञ्चैव ब्रह्मलोकः परागतिः ॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्तस्य वदनम् । "वद सुपि क्यप् च ।" ३ । १ । १०६ । इति भावे यत् ।) ब्रह्मणो वाक्यम् । इति ल्यप्रकरणे मुग्धबोधटीकायां दुर्गादासः ॥

ब्रह्मवद्या, त्रि, (ब्रह्मणा वेदेन उद्यते या । "वदः सुपि क्यप् च ।" ३ । १ । १०६ । इति कर्म्मणि यत् स्त्रियां टाप् ।) कथा । इति मुग्धबोधव्याकरणे ल्यप्रकरणम् ॥

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चस्तेजः । "ब्रह्महस्तिभ्यां वर्च्चसः ।" ५ । ४ । ७८ । इति अच् ।) ब्राह्मणस्य वृत्ताध्ययनर्द्धिः । इत्यमरः । २ । ७ । ३६ ॥ अस्य टीका । वेदबोधितस्याचारस्य परिपालनं वृत्तम् । व्रतग्रहणपूर्व्वकं गुरुमुखेन वेदाभ्यासोऽध्ययनम् । तयोरर्द्धिस्तत्परिपालनजातस्तेजस उपचयो ब्रह्मवर्च्चसं स्यात् । ब्रह्महस्तिराजेति अः । इति भरतः ॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्च्चसम् । इति जटाधरः ॥ (तथा च मनुः ।४।९४।

"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ।
प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्च्चसमेव च ॥")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणां ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन् ।) ब्रह्मावर्त्तदेशः । इति शब्दरत्नावली ॥ (सरस्वतीदृषद्वत्यो र्देवनद्यो र्मध्यगतोऽयं प्रदेशः ॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मणस्तपसो वर्द्धनं यस्मात् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥

ब्रह्मवादः पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत् ।) वेदपाठः । तत्पर्य्यायः । श्रुतादानम् २ । इति हारावली । २२१ ॥ (यथा भागवते । ४ । २२ । ६२ ।

"बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः ॥"

ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवाक्यम् ॥ ब्रह्मवादो वेदपाठोऽस्यास्तीति ब्रह्मवादविशिष्टे, त्रि । यथा, हरिवंशे । ८१ । ३४ ।

"ब्राह्मणैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते ॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति । ब्रह्मवाद + णिनि ।) वेदवक्ता । तत्पर्य्यायः । वेदान्ती २ । इति जटाधरः ॥ यथा, गीतायाम् । १७ । २४ ।

"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥")

ब्रह्मवादिनी, स्त्री, गायत्री । यथा,—

"आयाहि वरदे देवि ! त्र्यक्षरे ब्रह्मवादिनि ! ॥"
इत्यादि गायत्र्या आवाहनम् ॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या ।) ब्रह्मज्ञानम् । यथा,—

"न्यायागतधनः शान्तो ब्रह्मविद्यापरायणः ।
स्वधर्म्मपालको नित्यं सोऽमृतत्वाय कल्पते ॥"
इति कौर्म्मे ३ अध्यायः ॥

(दुर्गा । यथा, महाभारते । ६ । २२ । २७ ।

"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति ! दुर्गे कान्तारवासिनि ! ॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः ।) वेदपाठे मुखनिर्गतविन्दुः । इति भरतः ॥

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः । यद्वा, ब्रह्मणि वेदकर्म्मार्थे यो वृक्षः ।) पलाशवृक्षः । इति हलायुधः ॥ उडुम्बरः । इति रत्नमाला ॥

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः ।) ब्राह्मणस्य जीवनोपायः । यथा,—

"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥"
इति श्रीभागवतम् ॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम् ।) ब्रह्मज्ञानम् । यथा,—

"प्राणायामः परं ब्रह्म परमात्मा चतुर्म्मुखः ।
प्राणायामः परं विष्णोर्ब्रह्मवेदस्वरूपकम् ॥"
इति गीतासारः ॥

ब्रह्मवेदिः, स्त्री. (ब्रह्मणो वेदिरिव ।) देशविशेषः । यथा,—

"ब्रह्मवेदिः कुरुक्षेत्रे पञ्चरामह्रदान्तरम् ॥"
इति हेमचन्द्रः । ४ । १६ ॥

ब्रह्मवैवर्त्तं, क्ली, (विवृतिरेव वैवर्त्तम् । स्वार्थे अण् । ब्रह्मणो वैवर्त्तं विशेषेण विवृतिर्यत्र ।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । ५८ ।

"विवृतं ब्रह्म कार्त्स्न्येन कृष्णेन यत्र शौनक ! ।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः ॥")

अष्टादशमहापुराणान्तर्गतदशमपुराणम् । यथा,

"अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीप्सितम् ।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः ॥

ब्रह्मशल्यः, पुं, (ब्रह्मेव सूक्ष्मं शल्यमग्रभागो यस्य । अतिसूक्ष्माग्रत्वात्तथात्वम् ।) सोमवल्कः । इति रत्नमाला ॥ बावला इति भाषा ॥

ब्रह्मशासनं, क्ली, (ब्रह्मणः शासनं निर्णयो उपदेशो वा यस्मिन् ।) ब्रह्मविचारग्रन्थम् । तत्पर्य्यायः । धर्म्मकीलकः २ । इति शब्दरत्नावली ॥ ब्रह्मण आज्ञा ॥ नवद्वीपस्य पूर्व्वदक्षिणकोणे गङ्गापारे ग्रामविशेषे, पुं ॥ (ब्रह्मणो विधातुः शासनम् । वेदः ॥ प्रतिपादितमेतत् बृहन्नारदीये ४ पादे १०१ अध्याये ॥)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता ।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः । यथा,—

"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता ।
सर्व्वोपनिषदां सारैः सञ्चिता ब्रह्मणोदिता ॥"

इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यपञ्चमाध्यायस्य जीवगोस्वामिकृतटीका ॥

ब्रह्मसम्भवः, पुं, द्विपृष्ठनामककृष्णविशेषः । इति हेमचन्द्रः ॥

ब्रह्मसर्पः, पुं, (ब्रह्म वृहन् सर्पः ।) सर्पविशेषः । तत्पर्य्यायः । हलाहलः २ अम्बलाला ३ । इति त्रिकाण्डशेषः ॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युजः । "इगुपधेति ।" ३ । १ । १३५ । कः । ततः "तेन सहेति ।" २ । २ । २८ । इति बहुव्रीहिः । "वोपसर्जनस्य ।" ६ । ३ । ८२ । इति सहस्य सः । ततः सयुजस्य भावः सायुज्यं । यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप् । ततो बहुव्रीहिस्ततः सयुजो भावः । ततः ब्रह्मणः सायुज्यं योजकत्वम् ।) ब्रह्मणो भावः । तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मत्वम् ३ । इत्यमरः । २ । ७ । ५२ ॥ ब्रह्मसापूज्यम् ४ । इति शब्दरत्नावली ॥ (मुग्धबोधमतेऽस्य व्युत्पत्तिर्यथा ।) ब्रह्मणो भवनं ताद्रूप्यं ब्रह्मभूयं भूहनः क्वचिति क्यप् । त्वतौ भावे इति त्वे ब्रह्मत्वं । योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः । इति भरतः ॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्त्रो सावर्णिः ।) दशम मनुः । अस्मिन् मन्वन्तरे विश्वक्सेनोऽवतारः । शम्भुरिन्द्रः । सुरसेनविरुद्धाद्याः देवाः । हविष्मदाद्याः सप्तर्षयः । भूरिसेनाद्या मनुपुत्त्रा भविष्यन्ति । इति श्रीभागवतम् ।८।१३।२१-२२॥ अन्यच्च ।

"मन्वन्तरे तु दशमे ब्रह्मपुत्त्रस्य धीमतः ।
सुरसेना विरुद्धाश्च द्विप्रकारास्तथा स्मृताः ॥
शतसंख्या हि ते देवा भविष्यास्तत्र वै मनौ ।
तत्पुत्त्राणां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा ॥
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिसेनः सुवीर्य्यवान् ।
शतानीकोऽथ वृषभो अनमित्रो जयद्रथः ॥
भूरिद्युम्नः सुवर्च्चाश्च तस्यैते तनया मनोः ।"
इति ब्रह्मसावर्णिकम् ।

इति मार्कण्डेयपुराणे ॥ ९४ । ११-१६ ॥